শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে ত্রিষষ্টিতমং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে ত্রিষষ্টিতমং দশকম্॥

## গোৱর্ধনোদ্ধরণৱর্ণনম্

দদৃশিরে কিল তৎক্ষণমক্ষত -
 স্তনিতজৃম্ভিতকম্পিতদিক্তটাঃ।
সুষমযা ভৱদঙ্গতুলাং গতা
 ৱ্রজপদোপরি ৱারিধরাস্ত্ৱযা॥ **63.1** ॥

ৱিপুলকরকমিশ্রৈস্তোযধারানিপাতৈ -
 র্দিশি দিশি পশুপানাং মণ্ডলে দণ্ড্যমানে।
কুপিতহরিকৃতান্নঃ পাহি পাহীতি তেষাং
 ৱচনমজিত শৃণ্ৱন্ মা বিভীতেত্যভাণীঃ॥ **63.2** ॥

কুল ইহ খলু গোত্রো দৈৱতং গোত্রশত্রো -
 র্ৱিহতিমিহ স রুন্ধ্যাৎ কো নু ৱঃ সংশযোঽস্মিন্।
ইতি সহসিতৱাদী দেৱ গোৱর্দ্ধনাদ্রিং
 ৎৱরিতমুদমুমূলো মূলতো বালদোর্ভ্যাম্॥ **63.3** ॥

তদনু গিরিৱরস্য প্রোদ্ধৃতস্যাস্য তাৱৎ
 সিকতিলমৃদুদেশে দূরতো ৱারিতাপে।
পরিকরপরিমিশ্রান্ ধেনুগোপানধস্তা -
 দুপনিদধদধৎথা হস্তপদ্মেন শৈলম্॥ **63.4** ॥

ভৱতি ৱিধৃতশৈলে বালিকাভির্ৱযস্যৈ -
 রপি ৱিহিতৱিলাসং কেলিলাপাদিলোলে।

সন্ৱিধমিলিতধেনূরেকহস্তেন কণ্ডূ -
যতি সতি পশুপালাস্তোষমৈষন্ত সর্ৱে॥ **63.5** ॥

অতিমহান্ গিরিরেষ তু ৱামকে
করসরোরুহি তং ধরতে চিরম্।
কিমিদমদ্ভুতমদ্রিবলং ন্ৱিতি
ৎৱদৱলোকিভিরাকথি গোপকৈঃ॥ **63.6** ॥

অহহ ধার্ষ্ট্যমমুষ্য ৱটোর্গিরিং
ৱ্যথিতবাহুরসাৱৱরোপযেৎ।
ইতি হরিস্ত্ৱযি বদ্ধৱিগর্হণো
দিৱসসপ্তকমুগ্রমৱর্ষযৎ॥ **63.7** ॥

অচলতি ৎৱযি দেৱ পদাৎ পদং
গলিতসর্ৱজলে চ ঘনোৎকরে।
অপহৃতে মরুতা মরুতাম্পতি -
স্ত্ৱদভিশঙ্কিতধীঃ সমুপাদ্রৱৎ॥ **63.8** ॥

শমমুপেযুষি ৱর্ষভরে তদা
পশুপধেনুকুলে চ ৱিনির্গতে।
ভুৱি ৱিভো সমুপাহিতভূধরঃ
প্রমুদিতৈঃ পশুপৈঃ পরিরেভিষে॥ **63.9** ॥

ধরণিমেৱ পুরা ধৃতৱানসি
ক্ষিতিধরোদ্ধরণে তৱ কঃ শ্রমঃ।
ইতি নুতস্ত্রিদশৈঃ কমলাপতে
গুরুপুরালয পালয মাং গদাৎ॥ **63.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে ত্রিষষ্টিতমং দশকং সমাপ্তম্॥